9
C. 9
24

॥ उपलेखसूत्रम् ॥

(ऋग्वेदस्य)

॥ शौनकाचार्यशिष्येण केनचिन्महामुनिना प्रोक्तम् ॥

॥ स भा ष्य म् ॥

SRI CHAMARAJENDRA SANSKRIT COLLEGE
वाणी भजन गैर्वाणी
LIBRARY
FORT, BANGALORE.

॥ आचार्यश्रीसत्यव्रतसामश्रमिणा सम्पादितम् ॥

कलिकाता—सत्यव्रतं

(१८,१ घोषेस् लेन । सामश्रमिव्यवादितश्च)

॥ श्रीमहेन्द्रनाथसरकारेण मुद्रितं प्रकाशितञ्च ॥

॥ संवत् १९५१ ॥

॥ उपलेखसूचनम् ॥

पदशिष्ट मिति चास्यास्ति प्रसिद्धिः ; पदशास्त्र मिति तदर्थः। "अग्निमीळे पुरोहितम्"-इति संहितापाठः, "अग्निम्, ईळे, पुरःऽहितम्"-इति च तत्पदपाठः। पदपाठ मवलम्बैव "अग्निम्, ईळे ; ईळे, पुरोहितम् ; पुरोहित मिति पुरःऽहितम्"-इति क्रमपाठः। इत्थं क्रमपाठ मवलम्बैव जटाद्याः पाठा भवन्ति। तदुक्तं विकृतिवल्लयाम् "जटा, माला, शिखा, लेखा, ध्वजो, दण्डो, रथो, घनः। अष्टौ विकृतयः प्रोक्ताः क्रम-पूर्वा मनीषिभिः"-इति (१. ५.)। तदेवं क्रमपाठ इत्युक्ते जटादीना मष्टाना मेव बोधो जायते, अप्येषां सर्वेषा मेव पद-मूलकत्वात् पदपाठाभिन्नत्वञ्च। तादृशानां सर्वविधाना मेव पदपाठाना मिहानुशासनं प्रोक्त मित्यस्य नाम सम्यक्तं पदशिष्ट मिति। वस्तुतोऽयं ग्रन्थः खलु बह्वृक्प्रातिशाख्यस्यैव परिशिष्ट-विशेषः।

यतो ह्येष सूत्रग्रन्थः, ततोऽतिप्राचीन इति तु सिद्ध मेव ; प्रणेता त्वस्य कश्चिच्छौनकाचार्यशिष्य इति च प्रतीयते ; ग्रन्थान्ते 'नमः शौनकाय नमः शौनकाय'-इतिपाठात् ; दृश्यते ह्येव मेवाश्वलायनीयश्रौतसूत्राद्यवसानेऽपीति।

अस्ति चास्यैकं भाष्यं प्राचीनम्। तत् कदा केन रचित मिति त्वद्याप्यविज्ञात मेव। तज्ज्ञाप्यकर्तुर्मतेऽस्याष्टवर्गात्मकत्वम्, मूल-दर्शनात्त्ववगम्यते नववर्गात्मकत्वम् ; वस्तुतो मूलपुस्तकीयाष्टम-नवमावुभावेव वर्गौ तत्र भाष्ये एकीकृत्याष्टवर्गात्मकत्व मापा-दितम्। तथापि नो न क्षतिः। मूलपुस्तकपाठानां भाष्योद्धृत-पाठानां चास्ति मिथः किञ्चिन्नूनाधिक्यं क्रमव्यत्यासश्च।

स एष स्वल्पोऽपि प्रबन्धः पुरैकदा पदक्रमजटाद्यध्येतॄणां महा-
स्वार्थं मावहत्, अद्य तु प्रत्यक्षसंहितापाठाना मादरातिशया-
भावात् शुकमुखाध्ययनप्राचुर्याच्च एवंविधानां सर्ववैदिकादर्थ्य-
ग्रन्थानां महार्हत्वानुपलब्धेर्लुप्तकल्पतैव सम्पन्ना ।

अथास्यायितिकसमाजपुस्तकालयादितोऽस्य खण्डिताखण्ड-
तानि अशुद्धाल्पशुद्धानि प्राचीनान्यनतिप्राचीनानि च कतिचित्
पुस्तकानि सङ्गृहीतानि । तत्रैकस्य लिपिकालः संवत् १६१४
वैशाखः, अथापरस्य संवत् १६८० पौषः, अथान्यस्य संवत् १७०१
आषाढ़ः, अथ तुर्यस्य संवत् १८६३ वैशाख इति । तान्येवावलम्ब्य
यत्नतः संशोध्येद मद्य मुद्रायन्त्रसाहाय्यतो बहुलीकर्त्तुं सुद्यतः ।
सोऽयं मे प्रयासः स्यात्सुफलः परमेशकृपयेति शम् ॥

कलिकाता ।
शकाब्दाः १८१६ ।

श्रीसत्यव्रतशर्म्मा ।

॥ सूचीपत्रम् ॥

प्रथमवर्गारम्भः (स्वरवर्णादुपदेशाः) --- --- १
द्वितीयवर्गारम्भः (त्रिक्रमचतुःक्रमविशेषादीना मुपदेशाः) ५
तृतीयवर्गारम्भः (एकपदद्विपदादीना मुपदेशाः) --- ८
चतुर्थवर्गारम्भः (परिग्रह्याणा मुपदेशाः) --- १०
पञ्चमवर्गारम्भः (क्रमेषु षत्वणत्वाना मुपदेशाः) --- १५
षष्ठवर्गारम्भः (विसर्गान्तपदादीना मुपदेशाः) --- १७
सप्तमवर्गारम्भः (क्रमेषु पदान्तसन्ध्युपदेशाः) --- २०
अष्टमवर्गारम्भः (पदादिसन्धि-स्वर-कम्माना मुपदेशाः) -- २४

॥ अथ ॥

॥ उपलेखसूत्रम् ॥

अकारादयो द्वादश स्वराः ॥ १

अकार आदिः प्रथमो येषां ते अकारादयः। द्वौ च दश चेति द्वन्द्वः। स्वरा इति संज्ञा ऽभिधीयते। ननु यथा चित्रगु मानयेत्युक्ते विशेषणभूतानां गवा मानयने सम्बन्धो नास्ति, एव मकारादयः स्वरा इत्युक्ते विशेषणभूतस्याकारस्य स्वरसंज्ञा न प्राप्नोतीति चोद्यम्? नैतदस्ति; लम्बकर्ण मानयेत्युक्ते विशेषणभूतयोरपि कर्णयोरानयनेन सम्बन्धः, तथेहापि विशेषणभूतस्याकारस्य स्वरसंज्ञा भवति। एवं प्रतिसूत्रं वेदितव्यम्। इदानीं सूत्रार्थः संक्षिप्यते। अकारादयो द्वादशसंख्येया वर्णाः स्वरसंज्ञका भवन्ति। के पुनस्ते? उच्यन्ते — अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ इति। एषां पूर्वोक्तेन समासेन ग्रहणात् सर्वेषां स्वरसंज्ञा क्रियते, सम्यग्व्यवहारार्थं लोकन्याये च। तस्य प्रयोजनं किम्?। अथ स्वरादेराद्य मक्षरम्"-इति ॥ १ ॥

शिष्टं व्यञ्जनम् ॥ २

द्वादशेभ्यः स्वरेभ्यो यच्छिष्टं सुवरितं वर्णजातं तद्व्यञ्जनसंज्ञं भवति। व्यञ्जनसंज्ञायाः प्रयोजनं "नियतादेः परस्य"-इति। कानि पुनस्तानि? उच्यन्ते — क ख ग घ ङ च छ ज झ ञ ट ठ ड ढ ण त थ द ध न प फ ब भ म य र ल व श ष स ह ×क ४प अः अं ॥ २ ॥

ककारादयः पञ्चपञ्च वर्गाः स्पर्शाः ॥ ३

ककार आदिः येषां ते ककारादयः ; पञ्चपञ्चाक्षराणि वर्गसंज्ञानि भवन्ति। के पुनस्ते ? क ख ग घ ङाः। च छ ज झ ञाः। ट ठ ड ढ णाः। त थ द ध नाः। प फ ब भ माः। इति पञ्चविंशतिः कादयः स्पर्शा इत्युक्ताः ॥ ३ ॥

यकारादयश्चतस्रोऽन्तस्थाः ॥ ४

यकारआदिर्येषां ते यकारादयः ; चत्वारो वर्णा अन्तस्थसंज्ञा भवन्ति। के पुनस्ते ? य र ल वा इति। स्पर्शान्तस्थसंज्ञयोश्च प्रयोजनं तत्परिज्ञानार्थम् ॥ ४ ॥

शकारादयोऽष्टौ ऊष्माणः ॥ ५

×क५पौ विसर्गानुनाखारौ * ॥ ६

शकार आदिर्येषां ते शकारादयः। शकारादयोऽष्टौ ऊष्मसंज्ञा भवन्ति। के पुनस्ते ? उच्यन्ते — श ष स ह विसर्जनीयो जिह्वामूलीय उपध्मानीयो ऽनुनासिक इति। ऊष्मसंज्ञायाः प्रयोजनं "ऊष्मान्तेरेफेण"-इति ॥ ५ ॥ ६ ॥

प्रथमद्वितीया वर्गाणां मूष्माणश्च हकारवर्जं मघोषवन्तः ॥ ७

प्रथमाश्च द्वितीयाश्च वर्गाणां प्रथमद्वितीयाः। ऊष्माणश्च हकारं वर्जयित्वा अघोषसंज्ञा भवन्ति। के पुनस्ते ? उच्यन्ते — कख चछ टठ तथ पफ शषस जिह्वामूलीयोपध्मानीयविसर्जनीयानुस्वाराः † इति। अघोषसंज्ञायाः प्रयोजनम् "ऊर्ङ्ः स्वरितम्"-इत्यत्र ॥ ७ ॥

---

* 'विसर्गानुनासिकौ कष्यौ"-इति ख-पाठः। † 'विसर्जनीयानुनासिकाः'-इति ग-पाठः।

शिष्टं घोषवत् ॥ ८

अघोषसंज्ञेभ्यो ऽवशिष्टं मुर्वरितं व्यञ्जनजातं तत् घोषसंज्ञं भवति। तद्यथा— गघङ जझञ डढण दधन बभम यरलव हेति। घोषसंज्ञायाः प्रयोजनं तत्परिज्ञानार्थम् ॥ ८ ॥

ह्रस्व मेकमात्रम् ॥ ९

एका मात्रा यस्य स्वरस्य स एकमात्रः; स ह्रस्वसंज्ञो भवति। ह्रस्वसंज्ञायाः प्रयोजनं "ह्रस्वपूर्वो"-इत्यत्र ॥ ९ ॥

दीर्घं द्विमात्रम् ॥ १०

द्वे मात्रे यस्यासौ द्विमात्रः; तं स्वरं दीर्घं विजानीयात्। तस्याः प्रयोजनं दीर्घसन्धिं परिगृह्णीयात् ॥ १० ॥

प्लुतं त्रिमात्रम् ॥ ११

तिस्रो मात्रा यस्यासौ त्रिमात्रः। त्रिमात्रं स्वरं प्लुतं विजानीयात्। तस्याः प्रयोजनम् "पदवप्लुतिः"-इत्यत्र ॥ ११ ॥

व्यञ्जन मर्द्धमात्रम् ॥ १२

व्यञ्जनं पुनः अर्द्धमात्राकारं विजानीयात्। यथा काचिद्वनुम् ॥ १२ ॥

स्वरभक्तिश्चाक्रमे ॥ १३

रेफो यदा ऊष्मसु परतः ऋवर्णस्वरूप मापद्यते, तदा स्वरभक्तिरुच्यते। न क्रमः अक्रमः, तस्मिन् अक्रमे। क्रान्तिर्द्विवचनं द्वित्व मिति पर्यायः। असंयोगे परतः स्वरभक्तिरर्द्धमात्रा भवति। अदर्शि, यर्हीति ॥ १३ ॥

क्रमे त्वर्द्धीना ॥ १४

अर्द्धमात्रा अर्द्धीना भवति। मात्रायाश्चतुर्थो भाग इत्यर्थः। यथा अदर्श्यायती ॥ १४ ॥

क्रमो द्वैपदशः ॥ १५

द्वाभ्यां द्वाभ्यां पदाभ्यां द्वैपदशः। अग्निमीळे इति ॥ १५ ॥

तयोरुत्तरेणोत्तरं पदं सन्दध्यात् ॥ १६

यथा ईळे पुरोहित मिति ॥ १६ ॥

अर्द्धचात् * ॥ १७

अर्द्धचेन समापयेत्। पूर्वपूर्वं मुत्तरोत्तरेणार्द्धचेन सन्दध्यात् ॥ १७ ॥

ऊंइतीमित्याकारे षत्वसंहिते खितिपदे नः-परे नावस्येत् ॥ १८ ॥ १ ॥

क्रमो द्वैपदश इत्यस्याय मपवादः। एषु अवसानं न कुर्यात्। षत्वं संहिता यस्य स तत् षत्वसंहितम्। नः परपदं यस्मात् तत् नःपरं खितिपदम्। यथा। एतवाउ अग्ने। उदु त्यम्। त्यमु वः। यमीं गर्भम्। ए रिणन्ति। समी [illegible]च। स आ नः। मित्रयोरँा एति। महेषु णः। गव्येषु णः। अश्वा ऊ षु णः। षत्वसंहितइति किम्? तत्सु, सु नः, नेह। षत्वसंहितेत्यत्र खितिपदे नःपरेऽप्यवसानमिष्यते। तत्कथं लभ्यते? यदि षत्वसंहित इति तस्य विशेषणं क्रियते, तेन लभ्यते। यत्र षत्वसंहितस्याभावः, तत्रावसानप्रतिषेधाभावः। तत्सु। सु नः। नः सविता।

* 'अर्द्धचान्तात्'–इति क, ग।

नःपर इति किम् ? खितिपदे षत्वसंहितेपि अनःपरे अवसान-प्रतिषेधो माभूत् । ताभिरू षु । अधि षु । मो षु । ज षु ॥१८॥१॥

॥ इत्युपलेखभाष्ये प्रथमो वर्गः ॥

अथ यदुक्तं क्रमो द्वैपदश्च इति (४पृ०) ; किं पूर्वोक्तपदेन द्वितीयपदग्रह एव ? अत्रस्त मेवाधिकार मुपजीवन् विशेष मप्यपवाद माह—

न्याविध्यदिलीविशस्य ॥ १

अस्य त्रिपदक्रमस्य यन्मध्यपद मविध्यदिति, तत्र क्रमो द्वैपदश्च इत्यवसानं प्राप्तम् ; तत् न कुर्यात् । विलक्षणं चैतत् । वैलक्षण्यं चास्य दीर्घस्य लाक्षणिकत्वात् अविध्यदिति ॥ १ ॥

उषा आवर्त्तमः ॥ २

—इत्यत्र रेफो लाक्षणिकः ; तस्माद्विलक्षण ॥ २ ॥

न्यावृणङ्मरुत्वन्तम् ॥ ३

अत्र मध्यमप दीर्घत्वम्, अलाक्षणिकम् ॥ ३ ॥

अगादारैगुकृष्णा ॥ ४

आरैगिति दीर्घत्वम् ॥ ४ ॥

योनिमारैगप ॥ ५

आरैगिति दीर्घत्वम् ॥ ५ ॥

एनमायुनगिन्द्रः ॥ ६

आयुनगिति दीर्घत्वम् ॥ ६ ॥

अहिहन्नारिणाक्पथः ॥ ७

आरिणगिति दीर्घत्वम् ॥ ७ ॥

न्यावृणग् भरत ॥ ८

आवृणगिति दीर्घत्वम् ॥ ८ ॥

अंभ्यादेवमोजसा ॥ ९

आदेवमिति दीर्घत्वम् ॥ ९ ॥

रिक्थमारैक् चकार ॥ १०

आरैगिति दीर्घत्वम् ॥ १० ॥

रूप आरुपितं जबारु ॥ ११

आरुपितमिति दीर्घत्वम् ॥ ११ ॥

अनायुधास आसता सचन्ताम् ॥ १२

आसतेति दीर्घत्वम् ॥ १२ ॥

शुनश्चिच्छेपं निदितम् ॥ १३

शुनःशेपमि[illegible]स्य पदस्य मध्ये चिदिति अस्य प्रवेशः ॥ १३ ॥

क आसतो वचसः ॥ १४

आसत इति दीर्घत्वम् ॥ १४ ॥

य आयुक्त तुजा ॥ १५

आयुक्तेति दीर्घत्वम् ॥ १५ ॥

दुर्योण आवृणङ् मृध्रवाचः ॥ १६

आवृणगिति दीर्घत्वम् ॥ १६ ॥

दुर्योण आवृणङ् मृध्रवाचम् ॥ १७

पूर्ववत् ॥ १७ ॥

वीरास एतन मर्यासः ॥ १८

इतनेतीकारस्यैकारः ॥ १८ ॥

आ सु ष्मा णः ॥ १९

ष्मेति षत्वम् ॥ १९ ॥

अस्त्वासत इन्द्र ॥ २०

आसत इति दीर्घत्वम् ॥ २० ॥

हन्त्यासद्दन्तम् ॥ २१

आसदिति दीर्घत्वम् ॥ २१ ॥

नकिरादेव ओहते ॥ २२

आदेव इति दीर्घत्वम् ॥ २२ ॥

निराविध्यद्गिरिभ्यः ॥ २३

आविध्यदिति दीर्घत्वम् ॥ २३ ॥

ईयते नरा च शंसं दैव्यम् ॥ २४

नराशंस मित्यस्य पदस्य मध्ये च-शब्द-प्रवेशः ॥ २४ ॥

परीतो षिञ्चत ॥ २५

विसर्जनीयस्य [illegible]म् ॥ २५ ॥

कुरु श्रवण मावृणि राजानम् ॥ २६

आवृणीति दीर्घत्वम् ॥ २६ ॥

नरा वा शंसभ्यूषणम् ॥ २७

नराशंस मित्यस्य पदस्य मध्ये वा-शब्द-प्रवेशः ॥ २७ ॥

चित्कम्भनेन स्कभीयान् ॥ २८

स्कम्भनेनेत्यस्य पदस्य सकारापत्तिः ॥

इति सर्वेषु त्रिक्रमेषु चतुःक्रमेषु विलक्षणत्वं योज्यम् ॥ २८ ॥

एतेषां मध्यमपदान्यनवसानीयानि ॥ २९

एतेषां त्रिपदचतुःपदादीनां यानि मध्यमपदानि तानि अनवसानीयानि। एष्ववसानं न कुर्यादित्यर्थः ॥ २९ ॥

निरुखसारमस्कृतोषसमिति तु राज्ञां पञ्चक्रमः ॥३०

पञ्चपदानि क्रमे यस्मिन् सम्भवन्त्यसौ पञ्चक्रमः। अत्राप्यकृतेति सकारलोपो विलक्षणः ॥ ३० ॥ २ ॥

॥ इत्युपलेखभाष्ये द्वितीयो वर्गः ॥

साधुरसिक्त्यां सिषक्तुनः उरौदेवाः विद्वेषांस्यावाजं महिराधः श्रावांसुम्ने तेतेदेवाय रायस्कामः प्रतिनस्तोमं स्वायुधासः पितुर्नपुत्रः सनोवाजेषु गावोनयूथं पवस्वसोममन्दयग्निति तिस्रः परिसुवानोऽभिर्यमानः प्रत्यञ्चमर्कमनयञ्छशीभिरिति ॥ १

अर्ङ्चादित्युक्तम् (४पृ०) अत्र द्विपदैकप[illegible] कस्यचिन्मन्दबुद्धेः अर्ङ्चान् प्रत्यृचं भ्रान्तिः स्यात्, अतस्तन्निवारयितुं माह—साधुरित्यादि प्रत्यञ्चमर्कमनयञ्छशीभिरित्येत्यर्यन्तम् ॥ १ ॥

द्विपदैकपदा द्वाविंशतिस्तासां सप्तदश द्विपदाः पञ्चैकपदाः ॥ २

द्विपदैकपदा द्वाविंशतिरिति। द्विपदाश्च एकपदाश्च द्विपदैकपदाः। द्वे च विंशतिश्च द्वाविंशतिः। तासां द्वाविंशति-संख्या-

कानां द्विपदैकपदानां मध्ये पञ्च एकपदाः— असिक्रां सिषक्तुन, उरौ देवा, उरौ देवा, आ वां सुम्ने इति ; भद्रं न इति पाच्चिकत्वादपक्रमत्वाच्च नोक्ताः ; शिष्टाः सप्तदश द्विपदाः। अन्यास्त्रिपदाश्चतुष्पदाश्च ऋचः सम्भवन्ति। तत्र गायत्रीच्छन्दस्त्रिपदासु छन्दोत्तरासु च त्रिपदासु ऋक्षु पूर्वार्द्धं द्विपद मुत्तरार्द्धं तु पाद मेव। तस्मादेतास्वपि कस्य चित् अर्द्धावसानं प्रति भ्रान्तिः स्यात् ॥ २ ॥

भरद्वाजाय इतेरिवते तच्चक्षु वृंचाश्चिन्मे ऽधीन्वचेत्येतासां पञ्चानां पूर्वपादे ऽवस्येत् ॥ ३

भरद्वाजायेत्यादि। भरद्वाजाय इतेरिवते तच्चक्षु वृंचाश्चिन्मे ऽधीन्वचेति, एतासां पञ्चाना मृचा मर्द्धावसानं पूर्वपाद एव कुर्यात्॥३॥

पूर्वकृतं रूप मभिक्रमेद्यथासंहितम् ॥ ४

पूर्वेण कृतं पूर्वकृतम्। "क्रमो द्विपदः"—इत्युक्तम् (४पृ०) तत्र प्रथमं पदस्योच्चारण मभिक्रमः। एतस्मिन् पूर्वकृतं रूपं कुर्यात्। पूर्वं यत् कृतं पदं, तत्पदकृत मेवोत्तरस्य तु रूपं कुर्यात्। अग्निमीळे। इषा मन्दस्व। आद्या सच्चरणाः। यस्य स्व। अधिषु। विषु। निषु। युवोरूषु। विदिषु णः। महेषु णः। अधिष्णुना। इहो षु। ताभिरू षु ॥ ४ ॥

उत्तरकृतं प्रत्यादाने ; निषसाद, गोरोहिण, नृम्णा शीर्षसु, श्रद्धां हृदयेति निदर्शनानि ॥ ५

उत्तरेण कृतं उत्तरकृतम्। प्रत्यादानं पुनरादानम्, पदस्य द्वितीय मुच्चारणम्। तत्रोत्तरकृतं रूपं ब्रूयात्। आघागमत्।

घानः । सुवंसः । सूनेम । सुसुव । सूचर । सुरथ । स्रुभिः । विष्पर्द्धसः । विनृगमानि ॥ ५ ॥

सर्वमेवान्यद् यथासंहित माचरेत् ।
पूर्वोत्तरकृतं रूपं प्रत्यादानावसानयोः ।
न ब्रूयात् सर्व मेवान्यद् यथासंहित माचरेत् ॥
परुच्छेपऋचः प्राकृताः स नो नव्येभिरुभे पुना मीति पञ्चातिवायो ह्वे ऊर्तीदेवानां शचीभिर्नो ये देवासो दिव्येकादश स्थेति ॥ ६ ॥ ३ ॥

ब्रूयादित्यर्थः । गोषुयुधं नृषाह्वे । गोषुयुध मिति गोषु०-युधम् । नृषाह्वे चेत्रस्य । नृसाह्व इति नृ०साह्वे । इज्जास्यतिम् । जास्यतिं वा । जाः पति मिति जाःपतिम् । गन्तेयान्ति । इयान्ति सवना । कियात्यायत् । कियात्या प्रथमः । इन्द्रदुर्हणायाः । दुर्हणायाः पाहि । तन्व१आतिष्ठिपत् । आतिष्ठिपत् । तिष्ठिपत्ते । इषिरप्रणायसि । प्रणयसिप्र । स्वदस्वान् । अस्माँअवताम् । अस्रजद्विधर्त्ता । विधर्त्ताँ ऋतम् ॥६॥३॥

॥ इत्युपलेखभाष्ये तृतीयो वर्गः ॥

परिग्रह्याणि वक्ष्यामः ॥ १

परिग्रह्यन्ते वेष्टन्ते यानि पदानि, तानि परिग्रह्याणीति भण्यन्ते । तानि कथयिष्यामः ॥ १ ॥

अतीत्य परिगृह्णीयादवगृह्यस्य द्वितीये वचने ऽवग्रहः ॥ २

वेष्टनीयं यत्पदम्, तदतिक्रम्य परिगृह्णीयात्। वेष्टयेत्। ओत्वे। ओइत्वो। अवगृह्यस्य द्विखण्डस्य वेष्टनकाले यत् द्वितीयं वचनम्, तत्र खण्डनं कुर्यात्। पिबापिबेत्। पिबापिबेति पिब०पिब। सुषहासोम। सुसहेतिसु०सहा ॥ २ ॥

सहेति करणम् ॥ ३

इतिकरणेन सह वर्त्तते यत्, तत्सहेतिकरणम्; तच्च वेष्टयेत्। ओइत्वो ॥ ३ ॥

अवगृह्यम् ॥ ४

द्विखण्डं यत्, तच्च वेष्टयेत्। आर्चत्कस्येत्यार्चत्०कस्य ॥ ४ ॥

आदिविकृतौ धच्चिधुच्चिप्रवादौ ॥ ५

आदौ विकृतं विकारो ययो स्तावादिविकृतौ धच्चिधुच्चीत्येतौ सन्तौ च वेष्टयेत्। प्रवादग्रहणात् एवं प्रवादानामादिविकृतानां परिग्रहार्थम्। यथा— दच्चत्र। धच्चदिति धच्चत्। दच्चिसूरयः। धच्चौति धच्चि। द्वियानस्य दच्चोः। धच्चोरिति धच्चोः ॥ ५ ॥

अन्तःपदविकृत मनन्यकारितम् ॥ ६

अन्तर्मध्ये पदस्य विकारः यः तच्च वेष्टयेत्। सुसुमेति सुसुम। सिसिक्तेति सिसिक्त। शुनःशेपमिति शुनःशेपम्। नराशंसमिति नराशंसम्। ननामेति ननाम। दुधुच्चन्निति दुधुच्चन्। अधुच्चदित्यधुच्चत्। अन्यपदविकृतयेहिकारो न भवति। इन्द्रएणाः। अग्नेरवेण। इन्द्रएणम् ॥ ६ ॥

बहुमध्यगतानि ॥ ७

बहूनां मध्ये गतानि बहुमध्यगतानि, तानि च वेष्टयेत्। शुनश्चिच्छेपं निदित मित्यत्र चिदित्यस्य चयाणां मध्ये गतत्वात्। चिदिति चित्। विडिषुणः। स्तितिसु ॥ ७ ॥

आकारश्चानुनासिकः ॥ ८

अनुनासिको य आकारः, तच्च वेष्टयेत्। ईष्ट आँ अग्नयः। एत्या। मित्रयोराँ एति। एत्या ॥ ८ ॥

प्लुतादि च ॥ ९

प्लवत इति प्लुतः। ह्रस्वात् प्लवते वर्द्धते इति दीर्घ एव प्लुत-शब्देनोच्यते। यत्पदं ह्रस्वादि, संहितायां दीर्घादि सञ्जायते, तच्च वेष्टयेत्। आयुच्चातामश्विना। अयुच्चातामित्ययुच्चाताम्। आरैक्पन्थाम्। अरैगित्यरैक् ॥ ९ ॥

अर्द्धर्चान्तश्च ॥ १०

अर्द्धर्चस्य अन्तं यत्पदम्, तच्च वेष्टयेत्। ऋत्विजमित्य त्विजम्। एतानि वेष्टनीयान्युक्तानि ॥ १० ॥

इदानीं वेष्टनकाले लक्षण माह—

संहितावत्पूर्ववचनं पदवदुत्तरम् ॥ ११

संहितया तुल्यं वर्त्तते इति संहितावत्। पूर्वञ्च तद्वचन-श्चेति पूर्ववचनम्। पदेन तुल्यं वर्त्तत इति पदवत्। पूर्ववचनं संहितावद् ब्रूयात्। उत्तरं पदवत् ॥ ११ ॥

तयोरितिकरण मादुदात्तं मध्ये सपरिग्रहः ॥ १२

तयोर्द्वयोर्वचनयोर्मध्ये 'इतिकरण मादुदात्तम्' इतिकरण मादुदात्तं ब्रूयात्। ते पदे तु संहितायां सत्या मन्तर्भूतो यः

स परिग्रहः, वेष्टन मित्यर्थः। इतिकरणस्योभयतः सन्धिर्न स्यात्। तस्यादिनानिंग्यमिव पुनर्वचनं स्वारयेयुः। वेष्टनीयानां पदानाम् इतिकरणस्योभयतः सन्धिर्भवति; स्वरित्येतस्य पदस्योभयतः सन्धिर्न भवति। तस्य प्रगृह्यस्य स्वः-पदस्य इतिकरणस्यादिना सह सन्धिर्भवति। अथान्तेन किमर्थं प्रतिषिध्यते? "स्वरिता-देथेतिकरणान्तं नियच्छेत्"-इति सन्धौ नीचस्वरं वक्ष्यामि, तन्माभूदिति। अनिंग्यमवसानम्। तदेव पुनर्वचनं स्वारयेयुः। इतिकारान्तं स्वरं कुर्वन्तीत्यर्थः ॥ १२ ॥

शुद्ध माकारं प्रत्यादायोत्तरेण सन्दध्यात् ॥ १३

शुद्धन्निरनुनासिकं पुनरादायोत्तरेण सन्दध्यात्। यथासंहितं ब्रूयादित्यर्थः। इन्द्रेहि। एहि। अर्ङ्चादौ न। एम्। ईमेनम्। पश्चादोत्तरात्। ओत्तरात्। ह्वयामसि त्वा। त्वेन्द्र। एन्द्र। पूनर्भूरोषाः। ओषाः। बहुमध्यगतानीत्यनेन प्रत्यादाने आकारस्य परिग्रहः कस्मान्न भवति? तत्सत्य मेव! यदाकारस्यानुनासिक इति तदनर्थक मेव स्यात्। तस्मादनर्थकानि वचनानि ज्ञापकानि भवन्ति। अनन्यकारित शुनःशेप-नराशंसपदयोर्या-कारस्यानुनासिकस्य परिग्रहो भवत्येव मर्थं ज्ञापयति ॥ १३ ॥

समयात्यर माकार मर्ङ्चादाविवोत्सृजेत् ॥ १४

समयस्यान्तः समयात्यरः त मर्ङ्चादाविव यथा अर्ङ्चादौ आकारः प्रत्यादान मक्तत्वेवोत्सृज्यते, तथा समयात्यरोऽपि ॥ १४ ॥

न च तं समयं क्रामयेत् संहितं समयं ब्रूयात् ॥ १५

तं समयं न क्रामयेत्। किं तर्हि? समयसहितं ब्रूयात्। अध्वर्यवो यः शत मासहस्रम्। सहस्रं भूम्याः। सजोषसा

उषसा सूर्येण चैषम्। इषं नः। धातुर्द्युतात् सवितुश्च विष्णोरा-सूर्यात्। सूर्यादभरन् ॥ १५ ॥

ब्रूयात्तु समयोदयम् ॥ १६

उदयशब्दः परवाची। समयः उदयो यस्य समयोदयः, तं समयोदयं ब्रूयात् पुनरादद्यादित्यर्थः ॥ १६ ॥

अस्मादद्य सदसः सोम्यादाविद्याम अध्वर्यवो यः शत मा सहस्रं मित्रो न यो जनेष्वा यशो विश्वसा केतुर्भुवनस्य गर्भ आरोदसी इति निदर्शनानि ॥ १७

आविद्याम। मित्रो न यो जनेष्वा यशः।

आकारः समयाद्यस्तु उकारो यस्तथाविधः।
द्वितीये वचने वाच्यौ समयेन सहैव तौ ॥

आदौ भवः आद्यः, समयस्य आद्यः समयाद्यः; आकारः, तथा विध उकारश्च, द्वितीये वचने समयेन सह तौ वाच्यौ। भुवनस्य गर्भ आ रोदसी। आ रोदसी अपृणाज्जायमानः। आयुः सम् ॥ १७ ॥

चिक्रमः समयादौ चेत् पुनरप्यादिना सह तं पठेत्, ज नु पत्नीरा सर्वतातिं मिति निदर्शनानि ॥ १८

समू नु। ज नु पत्नीर्वृषभिर्जगम्युः ॥ १८ ॥

अकारइकारउकारान् व्यञ्जनपरान्वर्द्धमानान् पदवत्परिगृह्णीयात्। पुष्टवन्तो रथितमं सुमय मिति निदर्शनानि ॥ १९

अकारश्च इकारश्च उकारश्च अकार-इकार-उकाराः; तान् अकार-इकार-उकारान्। असंहितोच्चारणं स्पष्टवदनार्थम्। व्यञ्ज-

नानि पराणि येभ्यस्ते व्यञ्जनपराः ; तान् व्यञ्जनपरान् अकार-इकार-उकारान् संहिताकाले वर्तमानान् पदवद्दृष्टयेत् । "संहिता-वत्पूर्ववचनं पदवदुत्तरम् (१२पृ०)"-इत्यस्यापवादः । उदवतेत्युत्० अवता । रमय इति रमयः । परिहृता इति परि०हृताः । अभिवर्त्तेनेत्यभि०वर्त्तेन । मन्नु मन्विति मन्नु०मन्नु । सुमय-मिति सु०मयम् ॥ १९ ॥

अथ स्वरपराणि यथासंहितं परिगृह्णीयात् । अकवार्यधीमासं पुरूरुणेति निदर्शनानि ॥ २०

तान्येव अ इ उ अक्षराणि स्वरपराणि वर्तमानानि यदा सम्भवन्ति, तदा यथासंहितं परिगृह्णीयात् । देवावीरिति देव० अवीः । अकवारीत्यकव०अरी । अभोद्दइत्यभि०इदः । अधीमसी-त्यधि०इमसि । पुरूरुणेति पुरु०उरुणा ॥ २० ॥

उद्वतावर्जम् ॥ २१ ॥ ४ ॥

स्पष्टम् ॥ २१ ॥ ४ ॥

॥ इत्युपलेखभाष्ये चतुर्थो वर्गः ॥

टवर्गीयं संहितायां यत्पदे तवर्गीयं तत्पदव-त्परिगृह्णीयात् । अभिस्तनेते गिरिष्ठाश्चन्द्रं निर्णि-गिति निदर्शनानि ॥ १

टकारेणादिभूतोपलक्षितो वर्गः टवर्गः । टवर्गे भवः टवर्गीयः । संहिताकाले यद् व्यञ्जनं टवर्गीयम्, पदकाले तु तवर्गीयम्, तत्पद-वद्दृष्टयेत् । अभिस्तन इत्यभि०स्तने । त्रैस्तुभादिति त्रै०स्तुभात् ।

गिरिस्थामिति गिरि०स्थाम्। तिस्थिपदिति ति०स्थिपत्। पितृयानमिति पितृ०यानम् ॥ १ ॥

पद्ये विसर्जनीये तपरे * सकारापत्तिः सन्धौ। मौञ्हुस्तमायाविस्थ इति निदर्शने ॥ २

मौल्हुस्तमायेति मौल्हु:०तमाय। आविस्थइत्याविः०त्थः ॥२॥

षत्वं सकारस्य तु पदत्वत्परिग्रहणीयात् पुरु-सन्योरिति निदर्शनम् ॥ ३

पूर्वसूत्रात्पदे संहिताया मिति वर्त्तते। संहिताकाले यस्य पदस्य षत्वम्, पदकाले सत्वम्, तत्पदवद् वेष्टयेत्। पुरु सन्यो-रितिपुरु०सन्योः। सि सायेति सि०साय ॥ ३ ॥

स्तृष्टभूतं स्थृष्टभूतं नृम्णभूत मादौ सषभूतस्य तु पदवत् प्रत्यारम्भः। त मु ष्टुहि, के ष्ठा नरः, प्र णा इन्दो, स्तुष ऊ षु व इति निदर्शनानि † ॥ ४

ऊष्मवृत्तेर्नकारस्य तु परिग्रहे प्रकृत्या। उद-धीनि वास्थानस्माञ्छोनानि वाभीशूनिवेति निद-र्शनानि ॥ ५

ऊष्मणो वृत्तिर्यस्मिन्निति ऊष्मवृत्तिः। नकारो रेफभूतस्त-लोपश्च। अत्राप्यूष्मवृत्तेर्विध्यमानत्वात् पदकाले यो नकारः, तस्य संहिताकाले या ऊष्मवृत्तिः, सा वेष्टनकाले प्रकृत्या भवति;

---

* 'तयीः'—इति घ-पाठः। † सोदाहरणं सूत्र मिद मत्राख्यातं स्थितम्।

नकार एव भवतीत्यर्थः। सिन्धूनिवेति सिन्धून्० इव। अस्मानस्मानित्यस्मान्०अस्मान् ॥ ५ ॥

०ऊष्मा षकारः सकारो वा कपपर उपचारसंज्ञकस्तस्य लोपः परिग्रहे। चतुःपदीं चतुःकपर्दां रायःकामः पथःपथ इति निदर्शनानि ॥ ६ ॥ ५ ॥

कश्च पश्च कपौ, तौ परौ यस्मात्, असौ कपपरो य ऊष्मा षकारः सकारो वा, तस्य वेष्टनकाले लोपः। न च वर्णविनाशो लोप इष्यते; किं तर्हि? स्वरूपेणादर्शनम्। कपरो जिह्वामूलीय मापद्यते, पपर उपध्मानीयम्। दक्षिणतः कपर्दा इति दक्षिणतःर कपर्दाः। चतुः पादिति चतुःर पात्। चतुः पदी मिति चतुःर पदीम्। सहः क्षत मिति सहःर क्षतम्। चतुः कपर्देति चतुःर कपर्दा। आविः क्षखती मित्याविःर क्षखतीम् ॥ ६ ॥ ५ ॥

॥ इत्युपलेखभाष्ये पञ्चमो वर्गः ॥

पूर्ध्वःखरिति पदेष्वघोषवत्परेष्वन्तरा रेफलोपः परिग्रहे। पूःपतिं धूःसदं स्वःपति मिति निदर्शनानि ॥ १

पदस्य अवयवः पदः, पूः धूः स्वः इत्येतेषु पदावयवेषु सत्सु; अघोषवन्तः परा येभ्यः ते अघोषवत्पराः, एतेष्वघोषवत्परेषु, अन्तरा मध्ये यो रेफः, तस्य वेष्टनकाले लोपः। पपरो विसर्जनीय मापद्यते; सकारपरः सकारम्। पूः पति मिति पूःर पतिम्।

स्वः पति मिति स्वःर पतिम्। स्वः सातेति स्वःर साता। स्वः सा मिति स्वःर साम्। धूः सद मिति धूःर सदम् ॥ १ ॥

चपरे शकारापत्तिः सन्धौ। स्वश्चना: स्वश्चा इति निदर्शने ॥ २

पूर्वसूत्रात्स्वरित्यनुवर्त्तते। स्वरित्येतस्य पदस्य चकारे परे मध्ये यो रेफः, तस्य वेष्टनकाले पूर्ववल्लोपः, शकारापत्तिश्च। स्वश्चना इति स्वःर चनाः। स्वश्चा इति स्वःर चचाः ॥ २ ॥

परिपूर्वे क्रुत्परेऽन्तरा षकारलोपः परिग्रहे। परिक्रृखन्निति निर्शनम् ॥ ३

परीत्येतद्यत्र पूर्वपदम्, परः क्रृशब्दः, मध्ये यः षकारः, तस्य वेष्टनकाले लोपः। अयं वर्णाभावो लोपः। परि क्रृतस्येति परि०क्रृतस्य। परि क्रृता इति परि०क्रृताः। परि कृखन्निति परि०कृखन् ॥ ३ ॥

वनपूर्वे सदपरेऽन्तरा रेफलोपः परिग्रहे। वनसद इति निदर्शनम् ॥ ४

वनइतीतस्मिन् पूर्वे, सद उत्तरे, मध्ये यो रेफः, तस्य वेष्टनकाले अभावो लोपः। वनर्षदो वायवः। वन सद इति वन०सदः ॥ ४ ॥

ह्रस्वे च पूर्वपद्यान्ते चन्द्रशब्द उत्तरेऽन्तरा शकारलोपः परिग्रहे। सुचन्द्रं पुरुचन्द्रं हरिचन्द्र मिति निदर्शनानि ॥ ५

यत्र पूर्वपद्यस्यान्तो ह्रस्वो भवति, चन्द्रशब्दे परे, तत्र तयोर्मध्ये यः शकारः, तस्य वेष्टने शकारस्य अभावो लोपः। स्वयन्द्र-

मभवत्। स्व चन्द्र मिति स्व॰चन्द्रम्। विश्व चन्द्रा इति विश्व॰ चन्द्राः। हरि चन्द्र इति हरि॰चन्द्रः। सु चन्द्र मिति सु॰चन्द्रम्। पुरु चन्द्र मिति पुरु॰चन्द्रम् ॥ ५ ॥

धच्चिधुच्चिजुघुच्चतोऽक्तस्कम्भनेनेति पदवत्परिगृह्णीयात् ॥ ६

धच्चि धुच्चि धच्चन् जुघुच्चतः दुधुच्चन् अक्तस्कम्भनेनेत्येतानि पदवद्वेष्टयेत् ॥ ६ ॥

दूढ्यदूणाशदूलभप्रवादानुकारभूतान् रेफसहितान् पदवत्परिगृह्णीयात् दुर्ध्य दुर्नश दुर्दभ इति निदर्शनानि ॥ ७

दूढ्यदूणाशदूलभ इत्येतान् प्रवादान् क्रस्वेन उकारेण रेफेण च संयोगं कृत्वा पदवद्वेष्टयेत्। दुर्ध्य१ इति दुः२ ध्यः। दुर्ध्य१ इति दुः२ध्ये। दुर्ध्येति दुः२ध्या। दुर्नश मिति दुः२ नशम्। दुर्नशेति दुः२नशा। दुर्दभ१ इति दुः२ दभः। दुर्दभास१ इति दुः२ दभासः ॥ ७ ॥

स्वधितिरिवेति रेफसहितम् ॥ ८

स्वधितिरिवेत्येतत् पदं रेफसहितम्, पदवद् वेष्टयेत्। स्वधितीव रीयते। स्वधितिरिवेति स्वधितिः२ इव ॥ ८ ॥

ज्योतीरथप्रवादं यथासंहितम् ॥ ९ ॥ ६ ॥

"अकार-इकार-उकारान् व्यञ्जनपरान् वर्त्तमानान् पदवत्परिगृह्णीयात् (१४पृ०)"—इत्यनेन च पदवत्परिग्रहे प्राप्ते इद मारभ्यते। ज्योतीरथप्रवादानां वेष्टनकाले पूर्ववचनं संहितावद

ब्रूयात्। ज्योतीरथ मिति ज्योतिः२ रथम्। ज्योतीरथा इति ज्योतिः२ रथाः। ज्योतीरथ इति ज्योतिः२ रथः ॥ ८ ॥ ६ ॥

॥ इत्युपलेखभाष्ये षष्ठो वर्गः ॥

पदान्तस्येतेश्च सन्धीन्वक्ष्यामः ॥ १

पदस्य अन्तः पदान्तः यदुक्तं "संहितावत् पूर्ववचनं पदवदुत्तरम्", "तयोरितिकरण माद्युदात्तं मध्ये सपरिग्रहः (१२पृ०)" -इति। तस्य इतिकरणस्य च ये सन्धयो भवन्ति, तान् कथयिष्यामः ॥ १ ॥

अकाराकारावेकारम् ॥ २

अकारश्च आकारश्च अकाराकारौ; तौ पदान्तौ इतिकरणस्य इकारेण सह एकार मापद्यते। विश्वसौभगेति विश्व० सौभग। हिरण्यवाशीमत्तमेति हिरण्यवाशीमत्० तम। सप्तस्वसेति सप्त० स्वसा। सुजुष्टेति सु० जुष्टा ॥ २ ॥

इकारेकारावीकारम् ॥ ३

इकारश्च ईकारश्च इकारेकारौ; तौ पदान्तौ इतिकरणस्य इकारेण सह ईकार मापद्यते। विभावरीति विभा० वरि। सानसीति सा०नसि। आपप्रुषीत्या०पप्रुषी। ऊतीत्यू०ती ॥ ३ ॥

उकारो वकारम् ॥ ४

उकारः पदान्त इतिशब्दे परतः वकार मापद्यते। देवयुवति देव० यु। विभ्विति वि०भु ॥ ४ ॥

औकार आकारभूतो वकारम् ॥ ५

औकारः पदान्त इतिकरणे परे आकारवकारौ आपद्यते। ऋतद्वधावित्यृत० द्वधौ। सजोषसाविति स०जोषसौ ॥ ५ ॥

एकारअकारौ विवृत्या ॥ ६

एकारः पदान्त अकारभूतो विवृत्या वेष्टयेत्। विश्वजित इति विश्व०जिते ॥ ६ ॥

ऐकार आकारभूतो विवृत्या ॥ ७

ऐकारः पदान्तः आकारभूतो विवृत्या वेष्टनीयः। वाद्वधध्या उपासानक्ता। वद्वधध्या इति वद्व०ध्यै। परादा इति परा०दै ॥७॥

विन्दतीति दीर्घसन्धिं परिगृह्णीयात् ॥ ८

विन्दतीति एव औकारं दीर्घसन्धिम् परिगृह्णीयात् वेष्टयेत्। दीर्घः सन्धिर्यस्य सः दीर्घसन्धिः प्लुतसन्धिः, त्रिमात्रोच्चारणम् ॥८॥

द्वितीये वचने पदवद् प्लुतिः ॥ ९

तस्यैव इकारस्य वेष्यमानस्य यद् द्वितीयं वचनम्, तत्र प्लुतिः कार्या। पदवच्च सानुनासिक उच्चारणीयम्। विन्दतीति विन्दतौ३ ॥ ९ ॥

ऊष्मान्तं रेफेण ॥ १०

ऊष्मान्तं विसर्गान्तं यत्पदम्, तस्य इतिशब्दे परे रेफेण सह सन्दध्यात्। अङ्गिरित्यत्०भिः। मघोनौरिति मघो०नीः। देवयुरिति देव०युः। दर्शताभूः। भूरिति०भूः। चक्रुषेः। ऋषेरित्यृषेः। सचेमहिसचथ्यैः। सचथ्यै३रिति सच०थ्यैः। दिवःपृथिव्योरिति दिवःपृथि०व्योः। वर्त्तनिश्चीः। गौरिति गौः ॥१०॥

अकाराकारयोरन्तरा ऊष्मा पदे संहितायां वा रिफितो रेफेण ॥ ११

अकारश्च आकारश्च अकाराकारौ। तयोः अकाराकारयोः अन्तरङ्गः अन्तस्थः ऊष्मा पदकाले संहितायां वा, यो रिफितः, स रेफेण वेष्टयेत्। दोषावस्तर्द्विया। दोषावस्तरिति दोषा०वस्तः। पुनः पुनर्जायमाना। पुनःपुनरिति पुनःऽपुनः। देवभ्राः। भाः परावतः। भारिति भाः। हन्तनावधः। वधरिति वधः। धाराभिरचा। अचारित्यधाः॥ ११ ॥

अरिफितो विवृत्या ॥ १२

अकाराकारयोः परो य ऊष्मा पदे संहितायां वा अरिफितः, स विवृत्य वेष्टनीयः। दभौतिमावः। आव इत्यावः। बृहद्भाः। भा इति भाः। वातजूतास्तरणिभिः। वातजूता इति वात०जूताः॥ १२ ॥

अहरहः शुन्ध्युः ॥ १३

अरिफितो रेफेण वेष्टनीयः। अहरहः शुंध्युः। अहरहरित्यहःऽअहः॥ १३ ॥

वर्गाणां प्रथमान्तं स्वेन तृतीयेन ॥ १४

वर्गाणां प्रथमाः कचटतपाः, तदन्तं यत्पदं स्ववर्ग्येण तृतीयेन सह तद्वेष्टयेत्। हिरण्यनिर्निगिति हिरण्य०निर्निक्। शुचिसदिति शुचि०सत्। सुबिति सुप्॥ १४ ॥

स्वेनोत्तमान्त मुत्तमेन ॥ १५

वर्गाणा मुत्तमाः ङञणनमाः, तदन्तं यत्पदं तच्च इतिशब्दे परे स्वेनोत्तमेन सह सन्दध्यात्। धनञ्जय मिति धनं०जयम्॥ १५॥

ह्रस्वपूर्वौ ङनवन्तौ क्रामयेत्। मघवन् संदृगिति निदर्शने ॥ १६

ह्रस्वः पूर्वौ ययोस्तौ ह्रस्वपूर्वौ, तयोः क्रान्तिं कुर्यात् परिग्रहे। मघवन्निति मघ०वन्। सट्टङ्डिति स०ट्टङ् ॥ १६ ॥

दर्दिति वर्गिति पर्यावर्दिति ॥ १७

एतेषां दकारगकारौ परिग्रहे क्रामयेत्। दर्दिति दर्त्। वर्ग्गिति वर्क्। पर्यावर्द्दिति परि०आवर्त् ॥ १७ ॥

सहेतिकरणे यथापदसन्धिः ॥ १८

पूर्वोक्तविधेरय मपवादः। प्रगृह्यपदे वेद्यमाने यथापदवत् सन्धिः। चर्मणी इवेति चर्मणी०इव। अभिस्तुते इत्यभि०स्तुते। अस्मे इत्यस्मे ॥ १८ ॥

ष्णुसंहिते स्नुभिपदे यथापदप्रत्यारम्भः * ॥ १९

स्पष्टार्थ मेतत्। अधिष्णुभिः। स्नुभिरवीनाम्। स्नुभिरिति स्नुभिः ॥ १९ ॥

टकारान्तं ळकारेण† विभ्राळिति निदर्शनम् ॥२०॥७॥

पूर्वोक्तविधेरय मपवादः। टकारान्तं यत्पदं तस्य इतिशब्दे परतः ळकारेण सह सन्दध्यात्, वेष्टयेदित्यर्थः। भोजतेविट्। विळिति विट्। विभ्र[illegible]हत्। विभ्राळिति वि०भ्राट् ॥२०॥७॥

॥ इत्युपलेखभाष्ये सप्तमो वर्गः ॥

---

* 'यथापदवत्प्रत्यारम्भः'–इति घ। † 'लकारेण'–इति घ।

उक्तः सन्धिः पदान्तानाम् ॥ १

पदाना मन्ताः, तेषां पदान्तानां वेष्टनकाले इतिकरणेन सह सन्धिर्व्याख्यातः। उक्तस्यानुकीर्त्तनं वक्ष्यमाणेन सह सम्बन्ध-सिद्धये ॥ १ ॥

पदादीनां वक्ष्यामः ॥ २

पदाना मादयः, तेषां पदादीना मितिकरणान्तेन सह सन्धयो भवन्ति वेष्टनकाले। तान् वक्ष्यामः ॥ २ ॥

स्वरादि तयकारयोः संयोग मापद्यते ॥ ३

अकारादिः स्वर उक्तः (१पृ०) ; स्वर आदिर्यस्य पदस्य तत्पदं वेष्टनकाले इतिकरणान्तेन सह सन्धीयमानं तयकाराभ्यां सह संयोग मापद्यते। ऋत्विज मित्यृत्विजम्। ऋष्वौजा इत्यृष्व०ओजाः ॥३॥

इकारेकारवर्जम् ॥ ४

इकारश्च ईकारश्च इकारेकारौ, तौ वर्जयित्वा, अन्य-द्यत्, तकारयकाराभ्यां संयोग मापद्यते ; इकारईकारयोर्नोप-पद्यते ॥ ४ ॥

तावीकार मापद्यते ॥ ५

तौ इकार-ईकारौ इतिकरणान्तेन सह ईकारं प्राप्नुतः। इषुहस्तेनेतीषु०हस्तेन। अपामिति। इतीति। न्वीयते। ईयत इतीयते ॥ ५ ॥

व्यञ्जनाद्यसंयुक्तं प्रकृत्या ॥ ६

स्वरानन्तरं व्यञ्जन मादौ यस्य पदस्य तद्व्यञ्जनादि यत्पदम्, असंयुक्तम्, तत्र इतिकरणान्तेन सह प्रकृत्या सन्दध्यात् ; पररूपे

णेत्यर्थः। घृतपाक मिति घृत० पाकम्। पृश्निगावइति पृश्नि० गावः ॥ ६ ॥

संयोगादि ककारादि च क्रामयेत् ॥ ७

संयोगः आदिर्यस्य पदस्य तत्संयोगादि, ककार आदिर्यस्य पदस्य तच्चकारादि, संयोगादि यत्पदं तच्चकारादि च इतिकरणात् परं तदादि क्रामयेत्; द्वित्वं कुर्यादित्यर्थः। स्रुचक्रत्वेति स्रुच०कृत्वा प्रुषितप्सुभिरिति प्रुषित०प्सुभिः। शुतऋषिमिति श्शुत०ऋषिम्। छन्दस्तुभ इति च्छन्दःस्तुभः ॥ ७ ॥

उदात्तादनुदात्तं स्वारयेन्नचेत्स्वरितोदात्तपरम् ॥ ८

उदात्तात्पर मनुदात्तं स्वरितोदात्तपरं न चेत् स्वारयेत्; तत्स्वरितं कुर्यादित्यर्थः। अग्निमीळे। अग्ने तव ॥ ८ ॥

उदात्तेनैकीभूत मुदात्तम् भवेत् ॥ ९

उदात्तेन सहैकीभूतं स्वर मुदात्त मेव भवति। वक्ष्यतीति वक्ष्यति। इतीति ॥ ९ ॥

नियतं नियच्छेत् ॥ १०

नियतं नीच मनुदात्त मिति पर्यायः। "पूर्वकृतं रूप मभिक्रमेद् यथासंहितम्"-इत्यत्र (९) पूर्वेण कृतं पूर्वकृतम् इति उच्यमाने पदान्तप्रचयाव्यवच्छितेऽपि पूर्वकृतः प्रचयः कस्मान्न भवतीति यो मन्यते मन्दबुद्धिः, त मुद्दिश्य स्पष्टार्थं मिद मारभ्यते। अनुदात्तात्पर मनुदात्त एव भवति। य इन्द्रः। इन्द्रसोमपातमः। नघ। घेम्। ईमन्यत्। इमं मे गङ्गे यमुने सरस्वति ॥ १० ॥

स्वरितात्प्रचयः स्वरन्नयेत् ॥ ११

स्वरितात्परं मनुदात्तम् प्रचयस्वरं प्रापयेत्। अग्निं मीळे। उपोपमे ॥ ११ ॥

स्वरितात्पराणि यान्यनुदात्तानि कानि चित्।
सर्वाणि प्रचयं यान्ति उपोदात्तं निहन्यते ॥ १२,१३

स्वरितात्पराणि यानि कानिचिदनुदात्तानि, सर्वाणि प्रचयं स्वरं यान्ति। यथा ऋतेन मित्रावरुणावृतावृधावृतस्पृशा ॥ १२ ॥

उपशब्दः समीपवाची। उदात्तस्यानुदात्तस्य परः सोऽनुदात्तः। न विद्यते उदात्तो यस्य स्वरस्य सः अनुदात्तः। उपोदात्तं निहन्यते; प्रचयस्वराभ्यां मनुदात्तं भवतीत्यर्थः। व्यक्ता इति वि०अक्ताः। उपोपेत्युप०उप ॥ १३ * ॥

नियतादेः पदस्य व्यञ्जनादेरितिकरणान्तं स्वारयित्वा पदं प्रकृतिवद् ब्रूयाद्ब्रह्मधातम मिति निदर्शनम् ॥ १४

नियत मादौ यस्य पदस्य तत्पदं नियतादि; अनुदात्तादीत्यर्थः। व्यञ्जन मादौ यस्य पदस्य तद्व्यञ्जनादि। नियतव्यञ्जनादेः पदस्य इतिकरणान्तं स्वरितं कृत्वा पदं प्रकृतिवद् ब्रूयात्। सुरूपकृत्नुमिति सुरूप० कृत्नुम् ॥ १४ ॥

अथ स्वरादेराद्य मक्षरं सहेतिकरणान्तेन स्वारयित्वा पदशेषं प्रकृतिवद् ब्रूयात्। अग्नयाभवन्ती रिति निदर्शनम् ॥ १५

पूर्वसूत्रान्नियतादेः पदस्येत्यनुवर्त्तते। तथा नियतादेः स्वरादेः

* इहैव अष्टमो वर्गः समाप्तो मूलपुस्तके।

पदस्य प्रथम माद्यं वर्णं मितिकरणान्तेन सह स्मरितं कृत्वा पदशेषं प्रकृत्यैवोच्चारयेत्। अर्हरिखनिरित्यर्हरि० खनिः। आयइत्या० अये। ऋज्वञ्च इत्यृजु०अञ्चः। ऋजुमुष्का इत्यृजु०-मुष्काः। ऋणञ्चयस्येत्यृणं०चयस्य ॥ १५ ॥

उदात्तस्योदात्तादेश्च व्यञ्जनादेरेकाक्षरनियतस्य च स्वरादेः स्वरितादेश्चेतिकरणान्तं निरुक्तेत्। त्वे इति वायो इत्यव इति निदर्शनानि ॥ १६

उदात्तस्य पदस्य उदात्तादेर्व्यञ्जनादेश्च एकाक्षरं नियतं यस्य पदस्य तदेकाक्षरनियतम्; स्वरादिरिति तस्यैव विशेषणम्; एकाक्षरनियतस्य च स्वरादेः पदस्य च, स्वरितादेः पदस्य चैतेषां चतुर्णां मितिकरणान्त मनुदात्तं कुर्यात्। स इति सः। त इति ते। मनोजवसेति मनः२ जवसा। अम्बर इत्यप्०तुरः। अप्स्वित्यप्०सु। आयाइत्या०यै। स्वर्वतीति स्वः२ वती। व्योमतीति वि०ओमती। क्रोइति क्रो ॥ १६ ॥

उदात्तस्योदात्तादेश्च स्वरादेरितिकरण मुदात्तम् भवेत् ॥ १७

स्वरादेः उदात्तादेः उदात्तस्य स्वरादेरुदात्तादेः पदस्य च इतिकरणान्त मुदात्त मेव भवति। एत्या। ओइत्यो। ऋषिभिरित्यृषि०भिः ॥ १७ ॥

सर्वं नियतं प्रचयस्वरं नयेत् ॥ १८

इतिकरणात्परं सर्वं मनुदात्तं प्रचयस्वरं प्रापयेत्। अम्बर-तच्चादित्यच्चुरत०च्चुरत् ॥ १८ ॥

समाप्यद्यान्युत्तरे षट्परे राधोरथोग्नादिवोजाऋतश्च । अङ्गः पादुः प्रेति च पूर्वपद्यावनिंगयन्विक्रम मेषु कुर्यात् ॥ * १९

"क्रमो द्वैपदशः (४ पृ०)"-इत्यनेन पदप्रकृतित्वे निघातम् । तथा सति राधादिपदेषु न केन विलक्षणेन यत्किञ्चिन्न विहितम्, तस्मान्न राधाद्दिषु पदेषु अनेन विधिर्विधीयते । राधः रथः ग्नाः दिवः जाः ऋतः इतीतेषां पदावयवानां षण्णां परे समापाद्यसंज्ञा भवति । पूर्वपद्यावयवानां अङ्गः पादुः प्रेत्येतौ च एषु समापादेषु पदेषु अखण्डयन्विक्रमं कुर्यात् ; परिग्रहेऽवसानं कुर्यादित्यर्थः ॥ १९ ॥

कम्पयेन्नीचसृरितं ह्रसृदीर्घावुभौ सृरौ ॥ २०

यस्मिन् पदे यत् स्वरित मनुदात्तपूर्वं यकारयुक्तं चकारयुक्तं तन्नीचस्वरितं विद्यात् । तच्च कम्पयेत् ॥ २० ॥

ह्रस्वदीर्घावितितावुभौ स्वरावपि कम्पयेत् ॥ २१

परिग्रहे । सुभ्व१इति सु०भ्वः । आकाय्य१स्येत्या०काय्यस्य । मनुष्या३निति मनु०ष्यान् । अनूक्या३दित्यनू०क्यात् । सृण्ये३वेति सृण्या० इव ॥ २१ ॥

ह्रस्वे ह्रस्वं विजानीयाद्दीर्घे दीर्घं तथैव च ।
स्वरितस्यानुरूपेण कम्पं कुर्वीत शास्त्रवित् ॥ २२

कम्पस्य लक्षणान्तरे यदुक्तं "कम्पयेत् कम्पम्"-इत्यादि, तस्यार्थपदं विचार्यते । इह शास्त्रे नवकम्पस्य कालो विधी-

* इत आरभ्य टीकोद्धृतमूलपाठानां महत्सूलपुस्तकस्थपाठैरैक्यं नास्ति, तदिह टीकोद्धृतमूलपाठानेव यथायथं प्रकाश्य एतदादिमूलपाठार्थोपरिष्टादस्य काशिष्यन्त इति अर्थम् ।

यते। ह्रस्वे कम्यमाने पुनः ह्रस्वं विजानीयात्; ह्रस्वद्वय मित्यर्थः। दीर्घेऽपि तथैव दीर्घम्। अनुरूपेणेत्यनेन स्वरितस्य सादृश्यं पदञ्चार्द्धमात्रञ्च यथाक्रमेण कम्यस्य काल माहुः शौनकादयः ॥ २२ ॥

अन्त्यं पदं विचार्येत उदात्तो यत्र दृश्यते।
कम्पं तत्र न कुर्वीत न चोदात्तेन संयुतम्॥ २३,२४

"कम्पयेन्नीचस्वरितम्"-इत्यस्य (२८ पृ०) सामान्यसूत्र-स्यापवादः ॥ २३ ॥

नचोदात्तेनेति। अय मपि। नीचस्वरितस्य उदात्तेनैकादेशेऽपि कम्पो न भवतीति। वीर्येति वीर्या ॥ २४ ॥

उदात्तात् स्वरिताद्वापि कम्प उत्पद्यते क्वचित्॥ २५

नियमार्थोऽय मारम्भः। स्वरितस्य यदि कम्प उत्पद्यते, उदात्तपूर्वो यः स्वरः, स्वरितार्द्धपूर्वो वायः स्वरः, स एवेति ॥२५॥

संहितायां पदे वापि नीचस्वरित मुच्यते।
तत्पदं हि भवेत् कम्प माकारान्तञ्च वर्जयेत् ॥ २६

एकस्मिन् पदे यत्र स्वरितं संहिताकाले युक्त मयुक्तं वा अनुदात्तात् पूर्वं दृश्यते, तत्स्वरितवत्पदं परिग्रहणे कम्पयेत्। अभ्य१भौत्यभि० अभि। रोत्या३येति। रौति०आया। सुचौ३वेति सुचि०इव। चम्वौ३वेति चम्वि०इव। वीर्यें३णेति वीर्येण। पुरौ३ वेति पुरि०इव। शुचौ३वेति शुचि०इव ॥ २६ ॥

क्रमकाले त्वकम्प्यः स्यान्नीचञ्चेदुत्तरं पदम्॥ २७

अनेनोदात्तात् स्वरितात्परेभ्यो नियतम्। अस्य विशेषविषय माह— क्रमकाले इति। क्रमकाले परिग्रहकाले उदात्तात्

स्वरितात् पूर्वोऽयः स्वरितः, तयोर्मध्ये अनुदात्तेनाक्षरेण व्यवहिते च कम्पो न भव- तीति ॥ २७ ॥

न्यगित्येतस्यानीचानामपि कम्पः । व्योमे तनीचीवेत्युदात्तादीनाम् ॥ २८

नीचस्वरितस्य स्वर उक्तः । अनेनानीचानां व्योमप्रकृतीनामुदात्तानामपि न्यगित्येतस्य कम्पो विधीयते ॥ २८ ॥

व्यक्षारीत्यापेत्याकारान्तयोरपि च ॥ २९

स्पष्टार्थमेतत् ॥ २९ ॥

प्रशस्तिक्रदेकस्यचिदतो नो रुद्राः क्षवोच्चाः प्रथमं नानाच्चाग्ने त्वां हीन्द्रकटून्वस्याध्यर्षेषमूर्जम् । क्रमकाले नवकम्पलोपः ॥ ३०

"सर्वमेवान्यद्यथासंहितमाचरेत् (१० पृ०)"— इत्यस्यायमपवादः । समयादौ तं व्यवहितपदसन्धिनिमित्तो द्वयेषु कम्पः ॥ ३० ॥

यथापदं द्वैपदान्तेऽवस्येत् ॥ ३१

द्विपदानामन्ताः । द्विपदान्तेषु पदावसानमेवावस्येत्; अवसानं कुर्यादित्यर्थः । "क्रमो द्वैपदशः(४पृ०)"-इत्यस्यायं शेषः ॥ ३१

समयान्ते द्वैपदेऽवसेन्न च तं समयं क्रामयेत् ॥३२

समयादौ तत्पूर्वेण पदेन सह समयादिपदे गृहीते सति अवस्येत् । प्रप्रवः । प्रप्रेति प्र० प्र ॥ ३२ ॥

सन्धाय समयं परेण द्वैपदेऽवस्येत् ॥ ३३

ततः सर्वसमयं परेण सन्धाय तस्य द्वैपदेऽवस्येत् । "संहितं

समयं ब्रूयात् (१३६०)"-इत्यस्यायं शेषः। वस्त्रिष्टुग भिषं भन्द-ङीरायेन्द्वे ॥ ३३ ॥

एकं समये मध्ये चेदतिक्रम्य पदेन तत् ॥ ३४

यदि एक मेव पदं समयपरं हि तत्समयो मध्ये भवति, तदा पूर्वेण समयेन सह तत्पद मतिक्रम्य उत्तरेण पदेन अवस्येत्। ताश्वित्, चिन्नुनमरन्तिनो इत्यादौ ॥ ३४ ॥

त्र्यम्बकं भद्रन्नः प्रजापत ऋतञ्च सत्यञ्चेत्या-पदक्रमम् ॥ ३५

त्र्यम्बकं यजामहे। भद्रं नो अपि वातयेत्येकपदाया एव ग्रहणम्; ऋङ्मध्यपरिगृहीतत्वात्। प्रजापते न त्वदेतान्यन्यः। ऋतञ्च सत्यञ्चेति सूक्तग्रहणम्। एकस्मिन्नेव पदे ऋगादिनिश्चये सति सत्यञ्चेतिशब्दग्रहणेन अतिरिक्तेन सर्वग्रहण मिति ज्ञायते। एव मेताः षड्ऋचो नाधीयन्ते, क्रमाश्च; पदप्रकृतित्वात् क्रम-स्येति। तदेव मशेषं क्रमलक्षणं निर्वृत्त मिति 'आपदं क्रमश्च' -इत्युक्तम् ॥ ३५ ॥

इदानीं क्रमपाठस्य प्रवृत्तौ कारण माह—

क्रम मिम मुमयाभिगीतं
द्विजवरगुरुणादरेण प्रपठितम्।
पठितोऽपि पुण्यकर्मा
भवति शास्त्र मुपलेखं शास्त्र मुपलेखम् ॥ ३६

उप समीपे सदृशाः विशेषाः सन्निहिता इत्यर्थः। लेलिख्यन्ते

यस्मिन् तान्, लेखयति गणयति कृत्स्नशो निरूपयति इत्युपलेखः। उपलेखशास्त्रं च संज्ञाविशेषः।

(१) स्वरादयः पूर्वं मुक्ताः। (२) ततस्त्रिक मचतुःक्रम-विशेषाः। (३) तत एकपदा द्विपदाः। (४) ततः परिगृह्याणि। (५) ततः षत्वणत्वानि। (६) ततो विसर्गान्तपदादीनां विशेषाः। (७) पदाद्यन्तयोः सन्धिविशेषाः। (८) ततः स्वरविधयः कम्प-विषयाश्च।— इतीयं सदृशाः सदृशविधयः। तस्मादिद मुप-लेखशास्त्र मिति ॥ ३६ ॥

शास्त्रान्ते लेखकाचार्यं नमस्करोति—

नमः शौनकाय नमः शौनकाय ॥ ३७ ॥ ८

आदरार्थः परितोषार्थो वा द्विरभ्यासः ॥ ३७ ॥ ८ ॥

॥ इत्युपलेखभाष्ये अष्टमो वर्गः ॥

॥ समाप्तं चेद मुपलेखाख्यं पदशिष्टम् ॥

॥ हरिः ॐ ॥

———